## केशाश्वाभ्यां यञ्छावन्यतरस्याम् । (४८/१२५७)

केश अश्व इत्येताभ्यां [1]यथासङ्ख्यं यञ् छ इत्येतौ प्रत्ययौ भवतोऽन्यतरस्यां तस्य समूहः इत्येतस्मिन् विषये। केशानां समूहः कैश्यम्, कैशिकम् । [2]अश्वानां समूहः अश्वीयम्, आश्वम् ॥

## पाशादिभ्यो यः । (४९/१२५८)

पाशादिभ्यः[3] यः प्रत्ययो भवति तस्य समूहः इत्येतस्मिन् [4]विषये । पाशानां समूहः पाश्या । तृण्या[5] ।

पाश । तृण । [6]धूम । वात । अङ्गार । [7]पोत । बालक । [8]पिटक । पिटाक । [9]शकट । हल । [10]नड । वन[11] ॥

## खलगोरथात् । (५०/१२५९)

खलगोरथशब्देभ्यः यः प्रत्ययो भवति तस्य समूहः इत्येतस्मिन् [12]विषये । खलानां समूहः खल्या । गव्या । रथ्या । [13]पाशादिष्वपाठः उत्तरार्थः ॥

## इनित्रकट्यचश्च । (५१/१२६०)

खलगोरथशब्देभ्यो यथासङ्ख्यम् इनि त्र कटचच् इत्येते प्रत्यया भवन्ति तस्य समूहः इत्येतस्मिन् [14]विषये। खलिनी । गोत्रा । रथकटचा ।

[४२४] खलादिभ्य इनिर्वक्तव्यः । (म. भा. २.२८२)
[15]डाकिनी । कुण्डलिनी । कुटुम्बिनी ।

[४२५] [16]कमलादिभ्यः खण्डच् [17]प्रत्ययो भवति ।
कमलखण्डम् । अम्भोजखण्डम् ।

[18]कमल । अम्भोज । पद्मिनी । कुमुद । सरोज । पद्म । नलिनी । कैरविणी ।
कमलादिराकृतिगणः ।

[४२६] नरकरितुरङ्गाणां स्कन्धच् प्रत्ययः ।
नरस्कन्धः । करिस्कन्धः । तुरङ्गस्कन्धः ।

[४२७] पूर्वादिभ्यः काण्डः प्रत्ययो भवति ।
पूर्वकाण्डम् । तृणकाण्डम् । कर्मकाण्डम् ॥

---

1. यथासङ्ख्यम् नास्ति फ. ह. 2. अश्वानां समूहः नास्ति फ. 3. शब्देभ्यः इत्यधिकम् ब. क. ड. 4. अर्थे फ. 5. अत्र स्त्रीलिङ्गत्वं लोकाश्रयत्वात् लिङ्गस्य इत्यधिकम् फ. 6. भूम ब. 7. पोट गल ब. क, 8. पितृक ड. 9. सकट ग, शकलक, शक ब. 10. नट ड. 11. नल इत्यधिकम् क. ह, इति पाटलक ड. 12. अर्थे फ. 13. योगविभागः ब. फ. 14. अर्थे फ. 15. खलिनी, पाशादिः इत्यधिकम् ड. ब. फ. 16. कमलादिभ्यः – अम्भोज– खण्डम् नास्ति ब, कमलादिभ्यः–कर्मकाण्डम् नास्ति फ. 17. प्रत्ययः नास्ति इ. क. 18. कमल–आकृतिगणः नास्ति ह. डाकिनी, पद्मिनी, रथिनी फ, खलिनी, उलूकिनी, धमिनी, रथिनी, गविनी ह.